# Shri Madanagopalastotram

# શ્રીમદનગોપાલસ્તોત્રમ્

## Document Information

Text title : madanagopAlastotram

File name : madanagopAlastotram.itx

Category : vishhnu, krishna, raghunAthadAsagosvAmin, stavAvalI

Location : doc_vishhnu

Author : RaghunathadAsagosvAmi

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From Collected prayers by Raghunatha Dasa Goswami Stavavali

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 15, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# શ્રીમદનગોપાલસ્તોત્રમ્

વનભુવિ રવિકન્યાસ્વચ્છકચ્છાલિપાલિ
    ધ્વનિયુતવરતીર્થદ્વાદશાદિત્યકુઞ્જે ।
સકનકમણિવેદીમધ્યમધ્યાધિરૂઢઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧॥

સુભગનવશિખણ્ડભ્રાજદુષ્ણીષહારા-
    ઙ્ગદવલયસમુદ્રાધ્વાનમઞ્જીરરમ્યઃ ।
વસનઘુસૃણચર્ચામલ્લિકોલ્લાસિતાઙ્ગઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૨॥

કટિકૃતવરભઙ્ગન્યસ્તજઙ્ઘાન્યજઙ્ઘઃ
    કરયુગધૃતવંશીં ન્યસ્તબિમ્બાધરાગ્રે ।
સુમધુરમતિતિર્યગ્ગ્રીવયા વાદયંસ્તાં
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૩॥

વિધિકૃતવિધુસૃષ્ટિવ્યર્થતાકારિવક્ત્ર
    દ્યુતિલવહૃતરાધાસ્થૂલમાનાન્ધકારઃ ।
સ્મિતલપિતમધૂલ્યોન્માદિતૈતદ્ધૃષીકઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૪॥

શરદુદિતસરોજવ્રાતવિત્રાસિનેત્રઽ-
    ન્ચલકુટિલકટાક્ષૈર્મન્દરોડ્ડુણ્ડચાલૈઃ ।
ઝટિતિ મથિતરાધાસ્વાન્તદુગ્ધાર્ણવાન્તઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૫॥

કુટિલચટુલચિલ્લીવલ્લિલાસ્યેન લબ્ધ
    પ્રથિતસકલસાધ્વીધર્મરત્નપ્રસાદઃ ।
તિલકવદલિકેન ધ્વસ્તકામેષુચાપઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૬॥

શુકયુવવરચઞ્ચુપ્રાંશુનાસાંશુસિન્ધૌ
    જનિતકુલવધૂટીદૃષ્ટિમત્સ્યીવિહારઃ ।
સ્મિતલવયુતરાધાજલ્પમન્ત્રોન્મદાન્તઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૭॥

વિકસદધરબન્ધૂકાન્તરુડ્ડીય ગન્ધૈઃ
    પતિતમુપ વિધર્તું રાધિકાચિત્તભૃઙ્ગમ્ ।
દશનરુચિગુણાગ્રે દત્તતત્સીધુચારઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૮॥

શ્રવણમદનકન્દપ્રેક્ષણોડ્ડીનરાધા
    ધૃતિવિભવવિહઙ્ગે ન્યસ્તનેત્રાન્તબાણઃ ।
અલકમધુપદત્તદ્યોતમાધ્વીકસત્રઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૯॥

પરિમલરુચિપાલીશાલિગાન્ધર્વિકોદ્ય-
    ન્મુખકમલમધૂલીપાનમત્તદ્વિરેફઃ ।
મુકુરજયિકપોલે મૃગ્યતાચુમ્બબિમ્બઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૦॥

મકરમુખસદૃક્ષસ્વર્ણવર્ણાવતંસ
    પ્રચલનહૃતરાધાસર્વશારીરધર્મઃ ।
તદતિચલદૃગન્તસ્વસ્થવંશે ધૃતાક્ષઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૧॥

હરિમણિકૃતશઙ્ખશ્વાઘિતોલ્લઙ્ઘિલેખા
    ત્રયરુચિવૃતકણ્ઠસ્યોપકણ્ઠે મણીન્દ્રમ્ ।
દધદિહ પરિરબ્ધું રાધિકાં બિમ્બિતાં ચ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૨॥

કુવલયકૃતવક્ષસ્તલ્પમુચ્ચં દધાનઃ
    શ્રમવિલુલિતરાધાસ્વાપનાયૈવ નવ્યમ્ ।
ભુજયુગમપિ દિવ્યં તત્પ્રકાણ્ડોપધાનં
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૩॥

રુચિરજઠરપત્રે ચિત્રનાભીતટોદ્ય-

ત્તનુરુહતતિનામ્નીં બલ્લવીવૃન્દભુક્ત્યૈ ।
સ્મરનૃપતિસમુદ્રસ્વાક્ષરાલીં દધાનઃ
સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૪॥

યુવતિહૃદલસેભપ્રૌઢબન્ધાય કામ
સ્થપિતચિતરસોરુસ્તમ્ભજૃમ્ભાભિરામઃ ।
મરકતકટજૈત્રફુલ્લજાનુપ્રસન્નઃ
સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૫॥

પ્રણયનવમધૂનાં પાનમાત્રૈકગત્યા
સકલકરણજીવ્યં રાધિકામત્તભૃઙ્ગ્યાઃ ।
અરુણચરણકઞ્જદ્વન્દ્વમુલ્લાસ્ય પશ્ય-
ન્સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૬॥

અતુલવિલસદઙ્ગશ્રેણિવિન્યાસભઙ્ગ્યા
ગ્લપિતમદનકોટિસ્ફારસૌન્દર્યકીર્તિઃ ।
બલલવહતમત્તાપારપારીન્દ્રદર્પઃ
સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૭॥

તરણિદુહિતૃકચ્છે સ્વચ્છપાથોદધામા
સમુદિતનવકામાભિરરામાવલીણામ્ ।
તડિદતિરુચિબાહુસ્ફુર્જદંસોઽતિજૃમ્ભ-
ન્સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૮॥

નવતરુણિમભટ્ટાચાર્યવર્યેણ શાસ્ત્રં
મનસિજમુનિ કલ્પં ન્યાયમધ્યાપિતાભિઃ ।
નવનવયુવતીભિર્બિભ્રદુદ્ગ્રાહમસ્મિ-
ન્સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૯॥

રતિમતિરચયન્ત્યા રાધિકાનર્મકાન્ત્યા
સ્થગિતવચનદર્પઃ સ્ફારિતાન્યપ્રસઙ્ગઃ ।
ખરમતિલલિતાસ્યે કિઞ્ચિદઞ્ચત્સ્મિતાક્ષઃ
સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૨૦॥

સવિધરમિતરાધઃ સાગ્રજસ્નિગ્ધરૂપ
પ્રણયરુચિરચન્દ્રઃ કુઞ્જખેલાવિતન્દ્રઃ ।
રચિતજનચકોરપ્રેમપીયૂષવર્ષઃ

સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૨૧॥

મદનવલિતગોપાલસ્ય યઃ સ્તોત્રમેત-
ત્પઠતિ સુમતિરુદ્યદ્દૈન્યવન્યાભિષિક્તઃ ।
સ ખલુ વિષયરાગં સૌરિભાગં વિહાય
પ્રતિજનિ લભતે તત્પાદકઞ્જાનુરાગમ્ ॥ ૨૨॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીમદનગોપાલસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Shri Madanagopalastotram*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*